# সূর্যস্তুতী দ্বাদশার্যা সাম্বকৃত

{॥ সূর্যস্তুতী দ্বাদশার্যা সাম্বকৃত ॥}

অথ শ্রীসাম্বকৃতদ্বাদশার্যাসূর্যস্তুতিঃ ।

উদ্যন্নদ্যবিবস্বানারোহন্নুত্তরাং দিবং দেবঃ ।

হৃদ্রোগং মম সূর্যো হরিমাণং চাশু নাশযতু ॥ ১॥

নিমিষার্ধেনৈকেন দ্বে চ শতে দ্বে সহস্রে দ্বে ।

ক্রমমাণ যোজনানাং নমোঽস্তুতে নলিননাথায ॥ ২॥

কর্মজ্ঞানখদশকং মনশ্চ জীব ইতি বিশ্বসর্গায ।

দ্বাদশধা যো বিচরতি স দ্বাদশমূর্তিরস্তু মোদায ॥ ৩॥

ত্বং হি যজূঋক্সামঃ ত্বমাগমস্ত্বং বষটকারঃ ।

ত্বং বিশ্বং ত্বং হংসঃ ত্বং ভানো পরমহংসশ্চ ॥ ৪॥

শিবরূপাত্ জ্ঞানমহং ত্বত্তো মুক্তিং জনার্দনাকারাত্ ।

শিখিরূপাদৈশ্বর্যং ত্বত্তশ্চারোগ্যমিচ্ছামি ॥ ৫॥

ত্বচি দোষা দৃশি দোষাঃ হৃদি দোষা যেঽখিলেন্দ্রিযজদোষাঃ ।

তান্ পূষা হতদোষঃ কিঞ্চিদ্ রোষাগ্নিনা দহতু ॥ ৬॥

*Stotram Digitalized By Sanskritdocuments.org*

ধর্মার্থকামমোক্ষপ্রতিরোধানুগ্রতাপবেগকরান্ ।
বন্দীকৃতেন্দ্রিয়গণান্ গদান্ বিখণ্ডযতু চণ্ডাংশুঃ ॥ ৭॥

যেন বিনেদং তিমিরং জগদেত্য গ্রসতি চরমচরমখিলম্ ।
ধৃতবোধং তং নলিনীভর্তারং হর্তারমাপদামীডে ॥ ৮॥

যস্য সহস্রাভীশোরভীশু লেশো হিমাংশুবিম্বগতঃ ।
ভাসযতি নক্তমখিলং ভেদযতু বিপদ্গণানরুণঃ ॥ ৯॥

তিমিরমিব নেত্রতিমিরং পটলমিবাশেষরোগপটলং নঃ ।
কাশমিবাধিনিকাযং কালপিতা রোগযুক্ততাং হরতাত্ ॥ ১০॥

বাতাশ্মরীগদার্শস্ত্বগ্দোষমহোদরপ্রমেহাংশ্চ ।
গ্রহণীভগন্ধরাখ্যা মহতীস্ত্বং মে রুজো হংসি ॥ ১১॥

ত্বং মাতা ত্বং শরণং ত্বং ধাতা ত্বং ধনং ত্বমাচার্যঃ ।
ত্বং ত্রাতা ত্বং হর্তা বিপদামর্ক প্রসীদ মম ভানো ॥ ১২॥

ইত্যার্যাদ্বাদশকং সাম্বস্য পুরো নভঃস্থলাত্ পতিতম্ ।
পঠতাং ভাগ্যসমৃদ্ধিঃ সমস্তরোগক্ষযশ্চ স্যাত্ ॥ ১৩॥

ইতি শ্রীসাম্বকৃতদ্বাদশার্যাসূর্যস্তুতিঃ সম্পূর্ণা ।

Encoded and proofread by Usha Rani Sanka usharani dot sanka at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Dwadasarya Surya Stuti Lyrics in Bengali PDF
% File name : sAmbakRRitadvAdashAryAsUryastuti.itx
% Location : doc_z_misc_navagraha
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Usha Rani Sanka usharani dot sanka at gmail.com
% Proofread by : Usha Rani Sanka usharani dot sanka at gmail.com
% Latest update : August 16, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website